# विभक्तिः

०७ – १७.१०.२०१५

व्योम-संस्कृत-पाठशाला
www.sanskritfromhome.in

# मङ्गलम्

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः।
रामात् नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर॥

# मङ्गलम्

गुरुरेव गतिः गुरुमेव भजे
गुरुणैव सहास्मि नमो गुरवे।
न गुरोः परमं शिशुरस्मि गुरोः
मतिरस्ति गुरौ मम पाहि गुरो॥

व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |

# पुनरावर्तनम्

- द्वितीयाविभक्तिः – कर्मपदम्, कर्मपदात् द्वितीयाविभक्तिः
- द्वितीयाविभक्तिरूपाणि – त्रिषु वचनेषु
- द्विकर्मकप्रयोगाः – पृच्छति, वदति, बोधयति, प्रार्थयति, नयति
- सर्वनाम्नां द्वितीयाविभक्तिः

# उपपदद्वितीया - परितः




व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - १

श्रोतारः

गायिका

व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - २



व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |

# उपपदद्वितीया - विना

- जलं विना मीनाः न जीवन्ति।
- चन्द्रं विना रात्रिः न शोभते।
- रामं विना सीता अयोध्यायां न तिष्ठति।
- त्वां विना अहं न गच्छामि।

# अभ्यासः - ३

- आहारः
- दया
- मित्राणि
- नदी
- शिशुः
- पुत्री
- कथाः
- संस्कृतम्

विना

- वयं न जीवामः
- धर्मः नास्ति
- जीवनं दुष्करम्
- कृषिकार्यं न चलति
- गृहं न शोभते
- माता आपणं न गच्छति
- मम पुत्री न निद्राति
- संस्कृतिः नश्यति

# उपपदद्वितीया – उभयतः



[illegible]

# अभ्यासः - ४

| | | |
|---|---|---|
| उद्यानम् | गृहम् | उद्यानम् |
| आपणाः | मार्गः | आपणाः |
| क्रीडाङ्गणम् | शाला | क्रीडाङ्गणम् |
| नदी | नगरम् | नदी |
| गोपिकाः | कृष्णः | गोपिकाः |
| छात्राः | अध्यापकः | छात्राः |
| मित्राणि | बालिका | मित्राणि |
| अमात्याः | महाराजः | अमात्याः |
| सख्यः | राजकुमारी | सख्यः |

# उपपदद्वितीया

- सर्वतः – लङ्कां सर्वतः समुद्रः अस्ति।
- अभितः – कृष्णम् अभितः गोपाः सन्ति।
- समया/निकषा – नगरं समया वनम् अस्ति।
- अन्तरा – त्वां माम् अन्तरा हरिः।
- अन्तरेण – रामम् अन्तरेण गतिः नास्ति।
- धिक् – धिक् दुर्योधनम्!
- हा – हा सीताम्!

# अभ्यासः - ५

एकलव्यः निषादराजस्य (पुत्र)। सः (धनुर्विद्या) अभ्यसितुं द्रोणाचार्यस्य समीपम् आगच्छति। (द्रोण) (अस्त्रशिक्षा) प्रार्थयति। किन्तु (द्रोण) (तत्) पाठयितुं निराकरोति। (एकलव्य) निराशः। तथापि 'मया कथञ्चित् (धनुर्विद्याभ्यास) (करणीय) एव' इति निश्चयं करोति। एकलव्यः (वन) गत्वा मृत्तिकया द्रोणाचार्यस्य (प्रतिमा) निर्माति। (तत्-स्त्री) (प्रतिमा) नमस्कृत्य प्रतिदिनं श्रद्धया धनुर्विद्याभ्यासं करोति। अचिरादेव बाणप्रयोगे (कुशल) भवति।

# अभ्यासः - ५

- कदाचित् (पाण्डव) (कौरव) च (मृगया) कर्तुं (वन) आगच्छन्ति। तेषां (शुनक) अग्रे धावति। एकलव्यस्य समीपं गच्छति। (एकलव्य) अभ्यासे मग्नः अस्ति। (तत्) शुनकः तत्र स्थित्वा उच्चैः भषति। अभ्यासभङ्गेन (कुपित) (एकलव्य) युगपत् सप्त (बाण) तस्य शुनकस्य मुखे पूरयति। भषितुम् अशक्त (तत्) (शुनक) पाण्डवानां समीपं धावति। (तत्) दृष्ट्वा (पाण्डव) (चकित)। एतादृशः (बाणप्रयोगनिपुण) (किम्) इति अन्विष्यन्ति।

व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - ५

- एकलव्यस्य समीपम् आगच्छन्ति। (एकलव्य) अभितः द्रोणाचार्यस्य (प्रतिमा) पश्यन्ति। (एकलव्य) (प्रश्न) पृच्छन्ति - 'तव (गुरु) (किम्)?' इति। एकलव्यः (प्रतिमा) दर्शयति – (एतत्) (द्रोणाचार्य) एव मम गुरुः इति (पाण्डव) वदति। अर्जुनः (द्रोण) उपसरति। '(आचार्य)! (युष्मद्) लोकोत्तरं धनुर्धरं करिषामि इति (भवत्) उक्तवान्। किन्तु (एतत्) (एकलव्य) बाणप्रयोगे मत्तोऽपि (कुशल) अस्ति?' इति पृच्छति।

व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - ५

- द्रोणः (वन) गच्छति। (एकलव्य) परितः बाणान् पश्यति। (तत्) अभितः स्वस्य (प्रतिमा) अपि पश्यति। (एकलव्य) (आचार्य) दृष्ट्वा अत्यन्तं सन्तोषेण भक्त्या च (तत्) नमस्करोति। ‘(गुरुदेव)! (अस्मद्) धन्यः अस्मि’ इति वदति। द्रोणः एकलव्यस्य दक्षिणहस्तस्य (अङ्गुष्ठ) (गुरुदक्षिणा) पृच्छति। (दुःख) विना एकलव्यः स्वस्य (अङ्गुष्ठ) कर्तयित्वा गुरवे समर्पयति। अनन्या गुरुभक्तिः एकलव्यस्य!

# द्वितीयाविभक्तिः – सङ्क्षेपः

- कर्मपदम्
- कर्मपदात् द्वितीया / प्रथमा
- द्वितीयाविभक्तेः रूपाणि
- द्विकर्मकप्रयोगाः
- सर्वनाम्नां द्वितीयाविभक्तिः
- उपपदद्वितीया – परितः, विना, उभयतः अन्ये शब्दाः

# रटनम्